SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/06/2025
Volume – 7
Issue – 1
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# न्यायामृतस्थदृश्यत्वहेतुभङ्गस्य न्यायामृतरसकुलङ्कषरीत्या विमर्शः

बदरीनाथ बल्लारीः

भारतीयदार्शनिकसाहित्ये अधिकरण-प्रकरण-वादरूपेण भेदः समुपलभ्ये। तत्र अधिकरणं नाम "वेदान्तविचारात्मकः न्याय ग्रन्थः[१]" इति । अर्थात् यस्मिन् ग्रन्थभागे युक्तीनामुपयोगेन वेदान्तविचारः प्रवर्तते तस्य अधिकरणमिति संज्ञा भवति। उदाहरणार्थम् :- ब्रह्मसूत्रेषु अधिकरणव्यवहारः । एवं प्रकरणं नाम "शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम्[२]" । उदाहरणार्थम् :- द्वैतवेदान्ते दशप्रकरणानि एवमद्वैतवेदान्ते वेदान्तपरिभाषा-वेदान्तसारः न्यायशास्त्रे तर्कसंग्रहःन्यायसिद्धान्तमुक्तावलीत्यादि। अत्र सर्वत्र तत्तत् शास्त्रसम्बद्धसिद्धान्तानां प्रतिपादनं भवति। इदानीम् वादः नाम "तत्वनिर्णयफलः कथाविशेषः[३] इति। स्वसिद्धान्तप्रतिपादित तत्वानां स्थापनाय कथारूपेण {पक्षप्रतिपक्षरूपेण} यः ग्रन्थभागः प्रचलति तस्य वादशब्देन व्यवहारः। उदाहरणार्थम् :- श्रीहर्षस्य खण्डनखण्डखाद्यम्, व्यासतीर्थानां न्यायमृतम्, गदाधरस्य शक्तिवादः इत्यादि। पूर्वोक्तेषु ग्रन्थेषु ग्रन्थकाराः स्वस्वसिद्धान्तप्रतिपादित तत्वानां कथामुखेन स्थापितवन्तः। न्यायमृते उत्तरमीमांसातत्वानां पूर्वमीमांसायुक्तीनामुपयोगेन स्थापितवन्तः। उत्तरमीमांसेऽपि जगतः स्वरूपविषयकचर्चा द्वैताद्वैतनये दरीदृश्यते॥

बदरीनाथ बल्लारीः
सहायकप्राध्यापकः, दर्शनविभागः
पतंजति विश्वविद्यालयः, हरिद्वारम्
फोन् सख्या - 9482890492-8660881551
ई-मेल
ballary.badri199711@gmail.com
Badrinatha.bellary@uop.edu.in

प्रपञ्चमिथ्यात्ववादिनः जगतः मिथ्यात्वमनुमानप्रमाणेन साधयन्ति। अनुमानप्रयोगः एवं भवति :- विमतं मिथ्या दृश्यत्वात् सम्प्रतिपन्नवत् इति। अत्र विमतिविषयभूतः वियदादिप्रपञ्चःपक्षः। साध्यं मिथ्यात्वं । मिथ्यात्वं नाम् पञ्चपादिकारीत्या १.अनिर्वाच्यत्वम्[४] {सदसत्वानधिकरणत्वम्} २.विवरणरीत्या बाध्यत्वं[५] {प्रतिपन्नोपाधौ त्रैकालिकाभावप्रतियोगित्वम्}, ३.वार्तिककाररीत्या ज्ञानत्वेन ज्ञाननिवर्त्यत्वम्[६] ४. चित्सुखीरीत्या स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं[७] ५.आनन्दबोधरीत्या सद्विविक्तत्वं[८] इति पञ्चप्रकारेण साध्यनिर्वचनमनूद्य तत् खण्डनमपि कृतं कर्णाटकसिंहासनाधिश्वरेण न्यायमृतकारेण । तदित्थं :-

**अनिर्वाच्येऽप्रसिद्ध्यादिः प्रतीते प्रतिषेध्यता।**
**स्वाश्रयेऽत्यन्तविरहः सद्विलक्षणता तथा॥**
**इति पक्षत्रयेऽत्यन्तासत्त्वं स्यादनिवारितम्।**
**धीनाश्यत्वे त्वनित्यत्वमेव स्यान्न मृषात्मता॥**[९]

इदानीम् हेतुविषयकचर्चा क्रियते। अस्मिन् अनुमाने हेतुर्भवति दृश्यत्वम्। येन हेतुना मिथ्यात्वस्य सिषाधयिशितम् । तत् च स्वप्रतिभाया नोक्तं किन्तु बौद्धोक्तयुक्तिच्छर्दिमात्रम्:-

**स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात्तथा हि यः।**
**प्रत्ययस्स मृषा दृष्टः स्वप्नादिप्रत्ययो यथा॥**[१०]

अनेन श्लोकेन बौद्धानामनुमानप्राप्तिर्भवति। अयमत्रप्रयोगः "स्तम्भादिप्रत्ययः मिथ्या प्रत्ययत्वात् यथा स्वप्नादिप्रत्ययः" इति। अत्रापि भवता ज्ञानविषयत्वेनैव जगति मिथ्यात्वम् साध्यते। अतः अनयोः मतयोः मध्ये भेदाभावात् बौद्धानामेव हेतोः छर्दनं कृतमिति उक्तम्॥ इयांस्तु विशेषः - बौद्धमते ज्ञानिष्ठस्यार्थसत्वाभावघटितस्याप्रामाण्यस्य {ज्ञानग्राहकग्राह्यतया} स्वतस्त्वाभ्युपगमेन तथामिथ्यात्वसाधनं युक्तं । मायिनः मते तु अर्थसत्वघटितस्य ज्ञानप्रामाण्यस्य {ज्ञानग्राहकग्राह्यतया} स्वतस्त्वाङ्गीकारेण न युक्तं॥
मिथ्यात्वानुमाने दृश्यत्वं हेतुः तं दृश्यत्वं सप्तधा विकल्प्य विमर्शनं करोति व्यासतीर्थः ।
तद्याथा :-

1. दृश्यत्वम् = वृत्तिव्याप्यत्वम्।
2. दृश्यत्वम् = फलव्याप्यत्वम्।
3. दृश्यत्वम् = साधारणम्।
4. दृश्यत्वम् = कदाचित् चिद्विषयत्वम्।
5. दृश्यत्वम् = कथञ्चिद्विषयत्वम्।
6. दृश्यत्वम् = स्वव्यवहारे स्वातिरेकिसंविदपेक्षानियतिः।
7. दृश्यत्वम् = अस्वप्रकाशत्वम्।

तत्रादौ वृत्तिव्याप्यत्वपक्षः विचार्यते। अस्मिन् प्रथमपक्षे आहत्य पञ्चदोषाः न्यायामृते उक्ताः।

1. व्यभिचारः
    - A अप्रयोजकता
    - B गुरोः मौनं शिष्यस्य च मौढ्यं स्यात्
    - C कर्मणि षष्ठ्युपपत्तिः
    - D कर्मणि द्वितीयेति द्वितीया न स्यात्
    - E दृश्यतेत्वग्राया बुध्येत्यत्र तिङ् प्रत्ययानुपपत्तिः
    - F तव्यत् प्रत्ययानुपपत्तिः

    (A–F:) वृत्तिव्याप्यत्वस्यात्मन्यनङ्गीकारे एते
2. अज्ञानासिद्धिः
3. भागासिद्धिः
4. स्ववचनविरोधः
5. साधनवैकल्यम्

तस्य विवरणमेवं विद्यते। वृत्तिव्याप्यत्वं नाम=वृत्तिः - प्रत्यक्षादिकरणजन्य अन्तःकरणविशेषः। तया व्याप्यत्वं - तया सह विषयस्य संश्लेषविशेष इत्यर्थः। यदि एतदेव दृश्यत्वमिति अङ्गीक्रियते चेत् तदा मिथ्यात्वाभाववति आत्मनि वेदान्तजन्यवृत्तिव्याप्यत्वरूप दृश्यत्वस्य सत्वात् व्यभिचारः अयं प्रथमः दोषः। यदि वेदान्तजन्यवृत्तिव्याप्यत्वरूपहेतोः अभावात् न व्यभिचारः इति चेत् तदा वेदान्तनाम् ब्रह्मपरकत्वाभावात् अप्रयोजकता च स्यात् श्रवणादिविधीनाम् व्यर्थता च। एवमेव ब्रह्मणि वृत्तिव्याप्यत्वंस्याभावे ब्रह्मविचारयतः गुरोः मौनं शिष्यस्य च मौढ्यं स्यात्। एवमेव ब्रह्मणो वृत्तिव्याप्यत्वाभावे ब्रह्मजिज्ञासा ब्रह्मज्ञानमित्यत्र ब्रह्मशब्दस्य कृत् प्रत्ययान्ताभ्यां जिज्ञासापदज्ञानपदाभ्यां योगे जिज्ञासाज्ञानयोः कर्मभूत ब्रह्मपदस्य "कर्तृकर्मणोः कृतीति" [११] सूत्रेण षष्ठी भवति तस्याः च प्रतिपदविधाना च षष्ठी न समस्यते [१२] इत्यनेन समासनिषेधे प्राप्ते कृद्योगलक्षणा च षष्ठी समस्यत[१३] इत्यनेन प्रतिप्रसवात् षष्ठी समासः। तथा च कर्मणि षष्ठी न स्यात्। अपि च "तमेव धीरा" [१४]इत्यत्र तत् शब्दार्थस्य परमात्मनः "कर्तुरीप्सिततमं कर्म" [१५] त्यनेन कर्तुरधिकरणकः ज्ञानलक्षणक्रिययाप्तुमिष्टतमत्वेन कर्मसंज्ञायां "कर्मणि द्वितीये" [१६] ति द्वितीया भवति सा च न स्यात्। "दृश्यत्वेत्वग्राया बुध्येत्यत्र" [१७] ब्रह्मणो वृत्तिरूपदृक् कर्मत्वविवक्षायां दृषिर् प्रेक्षण इत्यस्मात्धातोः "भावकर्मणोरिति[१८]" सूत्रेण कर्मणि त प्रत्यये प्रत्ययाकारस्य "टित् आत्मनेपदानां टेरे" [१९] इत्यनेन एत्वे "सार्वधातुकेयगिति[२०]" यक् प्रत्यये च दृश्यत इति रूपम्। तत्र कर्मणि तिङ्प्रत्याहारान्तर्गत प्रत्ययो न स्यात्। "आत्मा वा आरे द्रष्टव्य" [२१] इत्यत्र आत्मनो दृक् कर्मत्वविवक्षायां दृशेर्धातोः

"तयोरेवकृत्यक्तखलर्थाः"[२२] इति सूत्रेण कृत्यसंज्ञक तव्यप्रत्ययः कर्मणिविहितः । स च न स्यात् । किञ्च दृगरूपस्य ब्रह्मणो वृत्तिव्याप्यत्वाभावे विशेषणज्ञानाभावेन दृग्विषयत्वरूपलक्षणविशिष्टस्यापि ज्ञानं न स्यात् तथा च अज्ञानासिद्धिः अयं द्वितीयः दोषः । अयं दोषः दृशोऽज्ञाने इति वाक्येन निरूपितं व्यासतीर्थैः । अनेनैव वाक्येन भागासिद्धिः अपि सूचितं भवति इति निरूपयन्ति आचार्यः । यतोऽहि दृक्शब्दितवृत्तिविषयत्वाभावे विशेषणज्ञानाभावेन प्रपञ्चनिष्ठे चिद्विषयलक्षणदृश्यत्वरूपे धर्मे वृत्तिविषयत्वरूपवृत्तिव्याप्यत्वस्याभावात् हेतोर्भागासिद्धिः अयं तुरीयः दोषः । अयं भागासिद्धिः न्यायामृतरसकुलङ्कषे अधिकं विद्यते। । चतुर्थस्तु "सर्व प्रत्ययवेद्ये च ब्रह्म रूपे व्यवस्थिते "[२३] अनया कारिकया ब्रह्मणः वृत्तिव्याप्यत्वमङ्गीकृत्य इदानीं निषिद्ध्यते चेत् तदा स्ववचनविरोधः ॥

ननु एतादृशानां दोषानां परिहाराय धर्मिसमसत्ताकवृत्तिव्याप्यत्वं अस्माभिः अभिप्रेतमितुच्यते चेत् तदा सदनुमानेऽपि विपक्षे साधनारोपलक्षणातिप्रसङ्गः भवति। एवं च आत्मा स्वप्रकाशः अनुभूतित्वात् इत्यत्र आत्मनि पारमार्थिकरूपेण स्वप्रकाशत्वादिरूपसाध्यस्य अभावात् बाधः। एवं स्वप्रकाशत्वसाधकानुभूतित्व हृतोः पारमार्थिकाकारेण अभावात् असिद्धिः। विमतं मिथ्या दृश्यत्वात् इत्यत्र विपक्षे धर्मिसमसत्ताकस्य हेतोः अभावात् अव्यभिचारश्च स्तात्। अतः धर्मिसमसत्ताकवृत्तिव्याप्यत्वं न अभिप्रेतव्यं ॥

अतः आत्मनि व्यभिचारः एवं मम मते {तत्ववादि मते} प्रातिभासिके शुक्तिरूप्ये व्यावहारिकस्य वृत्तिव्याप्यत्वस्य सत्वेऽपि तस्य धर्मिसत्ताकत्वाभावात् दृष्टान्तस्य साधनवैकल्यञ्च अयं अन्तिमः दोषः॥

अनन्तरं फलव्याप्यत्वरूपद्वितीयपक्षः विमर्श्यते। अत्र फलव्याप्यत्वम् नाम् विषयसन्निकृष्टबाह्येन्द्रियद्वारानिस्सृतविषयाकारान्तःकरणपरिणमप्रतिफलितं चैतन्यं वा । वृत्या तत् प्रतिबिम्बितचैतन्येन वाभिव्यक्तं विषयाधिष्ठानचैतन्यं वा फलम् । तद्विषयत्वमित्यर्थः। फलव्याप्यत्वरूपविशिष्टं हेतुं दूषयन् विशेषणीभूतफलशब्दार्थं आदौ विकल्पयति। आहत्य चतुषु प्रकारेषु फलशब्दार्थः भवितुं शक्यते । तत्र सर्वत्रापि एते दोषाः भवन्ति।
तद्यथा :-

| | | |
|---|---|---|
| फलव्याप्यत्वं | व्यवहारविषयत्वम् | गगनादावसिद्धिःआत्मनि व्यभिचारश्च |
| फलव्याप्यत्वं | ज्ञाततात्विषयत्वम् | द्वैतिरीत्या घटादौ असिद्धिः<br>अद्वैतिरीत्या<br>अतीतादावाश्रयाभावेनाश्रयासिद्धिः |
| फलव्याप्यत्वं | त्वद्रीत्या वृत्तिप्रतिफलितं चैतन्यविषयत्वम् | अतीतादावसिद्धिः |

| | | |
|---|---|---|
| फलव्याप्यत्वं | तदभिव्यक्तं विषयाधिष्ठानचैतन्यविषयत्वम् | अतीतादावसिद्धिः |

तस्य विवरणमेवं विद्यते। फलव्याप्यत्वं नाम व्यवहारविषयत्वमिति स्वीक्रियते चेत् तदा पक्षभूत गगनादौ हानादिरूपव्यवहारविषयत्वस्याभावात् असिद्धिः। साध्याभावति आत्मनि अभिलापरूपव्यवहारविषयत्वस्य सत्वात् व्यभिचारः। अतः फलव्याप्यत्वं नाम ज्ञातताविषयत्वमिति स्वीक्रियते चेत् तदा द्वैतिमते घटादौ ज्ञानविषयत्वातिरिक्तज्ञातताया अभावादसिद्धिः। परमते तु अतीतादावाश्रयाभावेनाश्रयासिद्धिः। अतः त्वद्रीत्या वृत्तिप्रतिफलितं चैतन्यविषयत्वम् अथवा तदभिव्यक्तविषयाधिष्ठानचैतन्यविषयत्वम् वा स्वीक्रियते चेत् अपरोक्षवृत्तावेव चैतन्यप्रतिफलनाङ्गीकारेणातीतेनागते च विषये तत् सन्निकृष्टेन्द्रियजन्य तदाकारान्तःकरणपरिणामरूपापरोक्षवृत्तेरभावेन तत्प्रतिफलितचैतन्यरूपस्य वा तदभिव्यक्तविषयाधिष्ठानचैतन्यरूपस्य वा फलस्यांभावेन तत्व्याप्यत्वाभावादसिद्धिः। तदपि स्वसत्ताकाले फलव्याप्यमेव भवति अतः नासिद्धिः इति चेत् तदा नित्यातीन्द्रिये निरुक्तापरोक्षवृत्तेरेवाभावेन फलव्याप्यत्वाभावादसिद्धिः। एवं च साक्षिवेद्याविद्यादावपरोक्षवृत्तेरेवाभावेन तत् प्रतिबिम्बितचैतन्यरूपफलव्याप्यत्वाभावादसिद्धिः। दृष्टान्ते च शुक्तिरूप्यादौ रूप्यांशे ज्ञानमविद्यावृत्तिरूपं साक्षिरूपं वेति मतद्वयेप्यन्तःकरणवृत्तेरभावेन फलव्याप्यत्वाभावात् साधनवैकल्यञ्च ॥

इदानीम् तृतीयपक्षः विचार्यते । साधारणमिति - साधारणं नाम

A. वृत्तिव्याप्यत्वफलव्याप्यत्वसाधारणम् ।
B. तदुभयान्यतरत्वं वा
C. व्यवहारजनकवृत्तिचैतन्यान्यतरविषयत्वं वेत्यर्थः ।

तदा पक्षत्रयेऽपि व्याप्यवति ब्रह्मणि व्यापकस्यावश्यम्भावात् ब्रह्मणि व्यभिचारः स्यात् ॥

नापि कदाचित् कथञ्चिद्विषयत्वम् – दृश्यत्वम् चतुर्थः पक्षः। अत्र आदौ दलसार्थक्यं प्रदर्श्यते कदाचित् कथञ्चिद्विषयत्वम् - अत्र चिद्विषयत्वस्य पक्षैकदेशे साक्षिवेद्याविद्यान्तःकरण तद्धर्मादौ सत्वेप्यतीन्द्रिये धर्मादावभावात् भागासिद्धिवारणाय कथञ्चिदिति । धर्मादौ साक्षाद्विषयत्वाभावेऽपि "धर्मादिकं न जानामीति" साक्षिवेद्याज्ञानद्वारा तद्विषयत्वस्य सत्वात् नासिद्धिः । एवमप्यतीते घटादावसिद्धिवारणाय कदाचिदिति । तस्य स्वसत्तादशायां वृत्तिप्रतिबिम्बित चिद्विषयत्वान्नासिद्धिरिति विशिष्टोपादानम्॥

एवमुक्तेऽपि एते दोषाः अपरिहार्ये १. व्यभिचारः २. हेत्वसिद्धिः। स्वव्यवहारे स्वविषयत्वस्य तन्त्रत्वेन कल्पितभेदेनापि ब्रह्मणः चिद्विषयत्वस्य शुद्धं ब्रह्म पूर्वं न ज्ञातमिदानीं वेदान्तेन ज्ञातमित्यनुभवेन

ब्रह्मणि व्यभिचारः। घटादिस्थल इव वृत्तिप्रतिफलितचित एवाज्ञाननिवर्तकत्वात् तदाकारत्वेन तन्निवर्तकत्वे घटादावपि तथात्वऽऽपत्त्या हेत्वसिद्धिः॥

स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिरूपः पञ्चमः पक्षः परीक्ष्यते। स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिः नाम - स्वव्यवहार इति स्वशब्देन समभिव्याहृतवियदादिपक्षः परामृश्यते । स्वस्य वियदादिप्रपञ्चस्य व्यवहारे स्वातिरिक्ता या संवित् वृत्ति र्वा तत् प्रतिफलितचैतन्यं वा साक्षी वा तदपेक्षानियतिस्तदपेक्षानियमः । स्वव्यवहारे नियमेन स्वातिरिकतसंविदपेक्षावत्वमित्यर्थः। तदा स्थलभेदेन षड् दोषाः भवन्ति।

१. असिद्धिः
२. व्यभिचारः
३. नियतिपदवैर्थ्यम्
४. व्यभिचारः
५. असिद्धिः
६. व्यवहारासिद्धिः

तेषां विवरणमेव विद्यते। स्वपदेन स्वरूपमात्रविवक्षणे निर्विकल्पकाङ्गीकर्तृमते {तार्किकमते} घटावसिद्धेः। स्वप्रकाशत्वाद्वितीयत्वादि गोचर वेदान्तजन्यस्वातिरिक्तसंविदपेक्षानियमाद्विशिष्टात्मव्यवहारे हि आत्मनि व्यभिचारः स्यात्। स्वांशे स्वातिरिक्तसंविदपेक्षाविवक्षणे च नियतिपदवैर्थ्यम् स्यात्। इष्टापत्तौ चाज्ञानावृते शुद्धे स्वव्यवहारार्थं वेदान्तजन्यवृत्त्यपेक्षणात् व्यभिचारः। वृत्त्यन्यसंविद्विवक्षायां घटादौ वृत्यन्यसंविदन्तरकल्पनमप्रामाणिकमिति व्यवहारासिद्धिः॥

अस्वप्रकाशत्वमिति षष्ठः पक्षः न युक्तः। अस्वप्रकाशत्वं नाम स्वप्रकाशत्वाभावः । अत्र आदौ दलसार्थक्यं प्रदर्श्यते स्वप्रकाशत्वं चावेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं। अवेद्यत्वं स्वप्रकाशत्वमित्येवोक्ते तुच्छेऽतिप्रसङ्गः। अपरोक्षेत्यादि विशेष्यमात्रग्रहणे घटादावतिव्याप्तिरतः सत्यन्तम् । वेदान्तजन्यवृत्तिविषये ब्रह्मान्यवेद्यत्वाभावात् स्वप्रकाशत्वं नस्यात् तन्निरासार्थं फलव्याप्यत्वमवेद्यत्वं विवक्षितम्। सुप्त्यादावपरोक्षव्यवहाररहितेह्यात्मन्यव्याप्तिवारणाय- योग्यत्वमिति ॥ एवं रूपं स्वप्रकाशत्वाभावस्य हेतोर्भागासिद्धिं दृष्टान्ते साधनवैकल्यं दोषद्वयचाह- घटादाविति ॥ विशेष्यवदपरोक्षव्यवहारयोग्यत्वरूपविशेष्यवत् । उक्तन्यायेनेति । वृत्त्यैवव्यवहाराद्युपपत्तौ तत् प्रतिप्रतिफलितचैतन्यकल्पने मानाभावादित्युक्तन्यायेनेत्यर्थः । अविद्यादाविति । साक्षिवेद्यत्वादविद्यादेस्तत्र फलव्याप्यत्वरूपविशेषणवदपरोक्षव्यवहारयोग्यत्वरूपविशेष्यस्यापि सत्वेनेत्यर्थः । एवं च घटादौ विशेषणाभावप्रत्युक्तो विशिष्टाभावः । अविद्यादौ शुक्तिरूप्यादौ च विशेष्याभावप्रयुक्तो विशिष्ट्य(ष्य)भावो अस्वप्रकाशत्वं हेतुर्नास्तीति भागासिद्धिर्दृष्टान्ते साधनवैकल्यं

चास्तीत्यर्थः । {अत्र धर्मादवतीन्द्रिये विशेष्याभावप्रयुक्तविशिष्टाभावरूपास्वप्रकाशत्वं हेतुरस्तीति पक्षैकदेश इत्युक्तम्}॥

महताप्रबन्धेन यन्निरूपितं तस्य संग्रहः क्रियते व्यासतीर्थैः।

**न धर्मादौ फलव्याप्तिर्वृत्तिव्याप्यत्वमात्मनि।**
**अज्ञातत्वादिरूपेण चिद्वेद्यत्वं तु चित्यपि।**
**अन्यापेक्षाभिलापत्वमस्त्यौपनिषदात्मनि।**
**त्वदुक्तास्वप्रभत्वं च रूप्ये नास्त्यस्तिचात्मनि॥**[२५]

फलव्याप्यत्वस्य धर्मादौ नित्यातीन्द्रिये ह्यसिद्धिर्वृत्तिव्याप्यत्वस्य साधारणशब्दित(ति)वृत्तिफलव्याप्यत्वान्यतरस्य कदाचित् कथञ्चिद्विषयत्वस्य व्यवहारे स्वातिरिक्तसंविदपेक्षानियमस्य अस्वप्रकाशत्वस्य चात्मनि व्यभिचारः । अस्वप्रकाशत्वस्य दृष्टान्ते वैकल्यं चेत्यर्थः। अतः अनुमाने दोषसद्भावात् तेन मिथ्यात्वस्य साधनमनुपपन्नम्॥

**<u>उपयुक्त ग्रन्थसूचि :-</u>**


१. स्वामी गौरीशङ्कर भिक्षु, सर्वलक्षणसंग्रह,चौखाम्बा संस्कृत सीरीज आफिस्, वाराणसि-२०१०, द्वितीयसंस्करणम् पत्र संख्या- ०७।
२. स्वामी गौरीशङ्कर भिक्षु, सर्वलक्षणसंग्रह,चौखाम्बा संस्कृत सीरीज आफिस्, वाराणसि-२०१०, द्वितीयसंस्करणम् पत्र संख्या- ८२।
३. स्वामी गौरीशङ्कर भिक्षु, सर्वलक्षणसंग्रह,चौखाम्बा संस्कृत सीरीज आफिस्, वाराणसि-२०१०, द्वितीयसंस्करणम् पत्र संख्या-११।
४. अचार्यपद्मपाद पञ्चपादिका- आचर्यः श्रीरामशास्त्रि भगवत् के ल् लाञरसकम्पनि वाराणासि १९८१ प्रथमसंस्करणम् पत्र संख्या-०।
५. यतिप्रकाशात्म, पञ्चपादिकाविवरणम् –प्रो. पि.एस् शास्त्रि, साधना ग्रन्थमण्डलि तेनालि,१९९७ प्रथमसंस्करणम।
६. सुरेश्वराचार्य, वार्तिकम् – काशीनाथ शास्त्री,आनन्दाश्रममुद्रणालयम् पुणे, १८९२ प्रथमसंस्करणम्।
७. आचार्य चित्सुख, तत्त्वप्रदीपिका – काशीनाथ शास्त्री, निर्णयसागर मुम्बयै, १९३९ द्वितीयसंस्करणम् ।
८. आनन्दबोधाचार्य,न्यायमकरन्द,चौखाम्बा संस्कृत सीरीज आफिस्, वाराणसि- १९०७ द्वितीयसंस्करणम् ।
९. व्यासतीर्थः, न्यायामृतम्, कृ.त पाण्डुरङ्गी द्वैतवेदान्ताध्ययन एवं संशोधन केन्द्रं बेङ्गलूरु १९९४

१०. कुमारिलभट्ट, श्लोकवार्तिक निरालम्बवादः गङ्गानाथ जा श्रीसत् गुरु, प्रकाशनम् देहलि १९८३
११. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-२.३.६४
१२. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-२.२.१०
१३. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र२.२.८
१४. बृहदारण्यकोपनिषद्, चतुर्थाध्यायः चतुर्थमन्त्रम्
१५. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-१.४.४९
१६. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-२.३.२
१७. कठोपनिषद् चतुर्थाध्यायः चतुर्थमन्त्रम्
१८. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-३.४.७१
१९. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-३.४.७१
२०. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-३.१.६७
२१. बृहदारण्यकोपनिषद्, चतुर्थाध्यायः पञ्चममन्त्रम्
२२. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-३.१.६७
२३. पाणिनि अष्टाध्यायि, डॉ. सुदर्शनदेव आचर्यः संस्कृत सेवा संस्थानम् हरियाण सूत्र-३.४.७०
२४. शाङ्कराचार्य ब्रह्मसूत्रभाष्यं चौखाम्बा संस्कृत सीरीज आफिस्, वाराणसि
२५. व्यासतीर्थः, न्यायामृतम्, कृ.त पाण्डुरङ्गी द्वैतवेदान्ताध्ययन एवं संशोधन केन्द्रं बेङ्गलूरु १९९४